# ॥ श्री मोक्षविंषक स्तोत्र ॥

ॐ नमोऽस्त्वनन्तपतये अक्षयाय महात्मने ।
जलेशाय देवाय पद्मनाभाय विष्णवे ॥ १ ॥

सप्तसूर्यवपुः कृत्वा त्रींल्लोकान् क्रान्तवानसि ।
भगवन् कालकालस्त्वं तेन सत्येन मोक्षय ॥ २ ॥

नष्टचन्द्रार्कगगने क्षीणयज्ञतपःक्रिये ।
पुनश्चिन्तयसे लोकांस्तेन सत्येन मोक्षय ॥ ३ ॥

ब्रह्मरुद्रेन्द्रवाय्वग्निसरिद्द्रुजगपर्वताः ।
त्वत्स्था दृष्टा द्विजेन्द्रेण तेन सत्येन मोक्षय ॥ ४ ॥

मार्कण्डेन पुरा कल्पे प्रविश्य जठरं तव ।
चराचरगतं दृष्टं तेन सत्येन मोक्षय ॥ ५ ॥

एको विद्यासहायस्त्वं योगी योगमुपागतः ।
पुनस्त्रैलोक्यमुत्सृज्य तेन सत्येन मोक्षय ॥ ६ ॥

जलशय्यामुपासीनो योगनिद्रामुपागतः ।
लोकांश्चिन्तयसे भूयः तेन सत्येन मोक्षय ॥ ७ ॥

वाराहं रूपमास्थाय वेदयज्ञपुरस्कृतम् ।
धरा जलोद्धृता येन तेन सत्येन मोक्षय ॥ ८ ॥

उद्धृत्य दंष्ट्रया यज्ञांस्त्रीन् पिण्डान्कृतवानसि ।
त्वं पितॄणामपि हरे तेन सत्येन मोक्षय ॥ ९ ॥

प्रदुद्रुवुः सुराः सर्वे हिरण्याक्षभयार्दिताः ।
परित्रातास्त्वया देव तेन सत्येन मोक्षय ॥ १० ॥

दीर्घवक्त्रेण रूपेण हिरण्याक्षस्य संयुगे ।
शिरो जहार चक्रेण तेन सत्येन मोक्षय ॥ ११ ॥

भग्नमूर्धास्थिमस्तिष्ठो हिरण्यकशिपुः पुरा ।
हुङ्कारेण हतो दैत्यः तेन सत्येन मोक्षय ॥ १२ ॥

दानवाभ्यां हृता वेदा ब्रह्मणः पश्यतः पुरा ।
परित्रातास्त्वया देव तेन सत्येन मोक्षय ॥ १३ ॥

कृत्वा हयशिरोरूपं हत्वा तु मधुकैटभौ ।
ब्रह्मणे तेऽर्पिता वेदाः तेन सत्येन मोक्षय ॥ १४ ॥

देवदानवगन्धर्वा यक्षसिद्धमहोरगाः ।
अन्तं तव न पश्यंति तेन सत्येन मोक्षय ॥ १५ ॥

अपांतरतमा नाम जातो देवस्य वै सुतः ।
कृताश्च तेन वेदार्था तेन सत्येन मोक्षय ॥ १६ ॥

वेदयज्ञाग्निहोत्राणि पितृयज्ञहवींषि च ।
रहस्यं तव देवस्य तेन सत्येन मोक्षय ॥ १७ ॥

ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः ।
त्वत्प्रसादाच्च चक्षुष्मां तेन सत्येन मोक्षय ॥ १८ ॥

ग्राहग्रस्तं गजेन्द्रं च दीनं मृत्युवशं गतम् ।
भक्तं मोक्षितवांस्त्वं हि तेन सत्येन मोक्षय ॥ १९ ॥

अक्षयश्चाव्ययश्च त्वं ब्रह्मण्यो भक्तवत्सलः ।
उच्छ्रितानां नियन्तासि तेन सत्येन मोक्षय ॥ २० ॥

शङ्खं चक्रं गदा पद्मं शार्ङ्गं गरुडमेव च ।
प्रसादयामि शिरसा ते बन्दान्मोक्षयन्तु माम् ॥ २१ ॥

॥ इति श्री हरिवंश पुराणे भविष्य पर्वे मोक्ष विंशक स्तोत्रं संपूर्णम् ॥